International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 276-278
© 2022 IJSR
www.anantaajournal.com
Received: 10-11-2021
Accepted: 26-12-2021

**Dr. GV Phaniraja Shastry**
Assistant Professor, Department of Apastamba Pourohitya, S.V.Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. GV Phaniraja Shastry**
Assistant Professor, Department of Apastamba Pourohitya, S.V.Vedic University, Tirupati, Andhra Pradesh, India

# आपस्तम्बधर्मसूत्रेषु सामाजिंक चिन्तनम्

**Dr. GV Phaniraja Shastry**

## प्रस्तावना

समो हि लोकः चराचरात्मकः स्वधर्मानुष्ठानेनैव प्रवर्तते। तमग्नः सूर्यः अस्तं गच्छन् दिनान्ते स्वं तेजः अग्नौ निक्षिप्य प्रातरुदेति, तस्योदयेन सर्वे प्राणिनः स्वविहितकर्मसु प्रभवन्ति। एतादृशं धर्मं महान्तं लोकोपकारकं सविता सृष्टेराम्भात् अविच्छन्नतया आचरति एवं अग्निरपि यज्ञेषु यजमानेन आहुतिरूपात्मकं दत्तं चर्वादि द्रव्यं मन्त्राभिमानिदेवतां प्रापयति, तेन पुनः प्रजा सृष्ट्यादिकं भवति।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः। म.स्मृ.३-७६

एवं चन्द्रमा अपि, विहितधर्माचरणेन इमं लोकं स्वकिरणजालेन पोषयति नद्यः गिरयः समस्तं प्राणिजातं तपश्चर्यया धर्ममनुतिष्ठति। बहुविधप्रकारेण सूर्यादयो देवाः स्वधर्ममनुतिष्ठन्तः लोकमिमं बिभ्रति। अत एव श्रुतौ "धर्मो विश्वस्य जागतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति" इति। यद्यपि पुरुषार्थचतुष्टये धर्मस्यैव अर्थकाममोक्षत्रिविधपुरुषार्थसाधनत्वमस्ति। ततः "धर्ममूलमिदं जगत्" "धर्मान्नप्रमदितव्यम्"स्वधर्मेनिधनं श्रेयः"इत्यादिश्रुतिस्मृतिवाक्यैः पापापनोदकशक्तिः श्रेयः प्रदानशक्तिश्च धर्मस्य वर्तते इत्यवगम्यते। धर्मो नाम श्रुतिस्मृतिबोधितत्वे सति शिष्टाचारप्राप्तः क्रियारूपः ज्योतिष्टोमादिः धर्म इति केचन मन्यन्ते, अत एव मनुस्मृतौ।

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः।
इहकीर्तिमवाप्नोति प्रेत्यचानुत्तमं सुखम्।। म.स्मृ २-०८

वास्तवगुणकथनेन श्रुतिस्मृत्युदित्तं ज्योतिष्टोमादिरूपं धर्ममनुतिष्ठेत् इति विधिः कल्प्यते, श्रुतिषु बीजरूपेण धर्मशास्त्रीयप्रमेयाः धर्मसूत्रेषु सस्यरूपेण भ्राजन्तः, स्मृतिग्रन्थेषु सुमफलविशिष्टमहावृक्षरूपेण विराजन्ते। एतादृश धर्मः पराशरसंहितायां बहुधा प्रपञ्चितम्।

धर्मस्य वैविध्यम्

धर्मा बहुविधा लोके श्रुतिभेदमुखोद्भवाः।
देश धर्माश्च दृश्यन्ते कुलधर्मास्तथैवच।
जातिधर्मा वयोधर्मा गुणधर्माश्च शोभने

शरीरकालधर्माश्च आपद्धर्मास्तथैव च
एतद्धर्मस्य नानात्वं क्रियते लोकवासिभिः।।

इत्थं बहुविधाः धर्माः सन्ति। स्वे स्वे कर्तव्ये स्वे स्वे धर्मे वर्तमानाः वर्णाश्रमस्थाः जनाः एकत्र वसेयुश्चेत् तेषां समूहः समाज इत्युच्यते। तादृशस्य समाजस्य सामाजिकोपयोगिनः धर्माः आपस्तम्बमहर्षिणा बहुत्र निगदिताः ते अत्र केचन प्रस्तूयन्ते।

"स्वधर्मयुक्तं कुटुम्बिनं अभ्यागच्छति धर्मपुरस्कारः नान्यप्रयोजनस्सोऽतिथिर्भवति" आ.ध.सू.२-७-०५

स्वधर्मनिरतं कुटुम्बिनं भार्यया सहवसन्तं गृहस्थाश्रमस्थमिति यावत् धर्मपुरस्कारः आचार्याद्यर्थं मातृपित्रर्थं वा भिक्षणं धर्मः एतदादिपुरस्कृत्य यः आगच्छति सः धर्मपुरस्कारः, नान्यप्रयोजनः नान्येच्छया अभ्यागच्छति सोऽतिथिः बौधायनस्तु "श्रान्तोऽदृष्टपूर्वः केवलमन्नार्थी नान्यप्रयोजनस्सोऽतिथिर्भवतीति" अतिथिलक्षणं समुपदिदेश, तादृशं अतिथिं अग्रेऽएव भोजयेदिति, यदि अतिथिः प्रत्यासन्नोभवति तं न प्रत्याचक्षीत काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयातम् तस्मै यत्किञ्चत् भोज्यं देयम्, यदि अकिञ्चनं गृहस्थं अतिथिरभ्यागच्छति तर्हि किं कर्तव्यमिति चेत् "अभावे भूमिरुदकं तृणानि कल्यणी वागित्येतानि वै सतोऽगारे न क्षीयन्ते कदाचनेति" २-०४-१४। उपवेशनयोग्या - भूमिः, पादप्रक्षालनादियोग्यम् - उदकं, शयनासनयोग्यानि-तृणानि, स्वागतमायुष्मते इति कल्यणी वाक् एतानि सत्पुरुषस्य निर्धनस्यापि गृहे न क्षीयन्ते कदाचन, अतः एतैरैव उपचार कर्तव्यः इति धर्मसूत्रेषु आपस्तम्बेन उपदिष्टम् श्रुतावपि - न कञ्चन वसतौ प्रत्याचक्षीत तद्व्रतम् तस्माद्ययाकया च विधया बह्वन्नं प्राप्नुयात्।
एवं यदि अतिथिः विद्यारहितश्चेदपि तं अतिथिं श्रोत्रियमिति मत्वा पूजयेत् "असमुदेतश्चेदतिथिब्रुवाण आगच्छेत्तदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यादेवमस्य समृद्धं भवति" २-०७-१७। विद्या-विज्ञानरहितः असमुदेतः, सचेदतिथिरूपेण ब्रुवाण आगच्छेत्तदा तस्मै आसनादिकं श्रोत्रियायैव ददामीत्येवं मनसिकृत्य दद्यात्, एवं ददतोऽस्य तद्दानं समृद्धं भवति श्रोत्रियायैव दत्तं भवति इति आचार्यस्याशयः। कथंचिदपि अन्नार्थिनं निराकुर्यादिति आपस्तम्बस्य विलक्षणं सामाजिकं चिन्तनम्। एवं अतिथिं भोजनादिना तर्पयित्वा गमनकालेऽपि तमतिथिमनुव्रजेत् "यानवन्तमायानात्" २-०९-०२ अतिथिर्यदि यानवान्भवति तं यानारोहणादनुव्रजेत् यदि यानरहितः यावन्नानुजानीयात् गच्छेति तं तावताऽनुव्रजेत् यदि अननुज्ञाते "अप्रतीभायां सीम्नि निवर्तेत" २-०९-०४ तस्यातिथेः अन्यपरतया अनुज्ञायां प्रतिभाबुद्धिः न जायते, ततः सीम्नि प्राप्तायां ततो निवर्तेत यजमानः। यदि आगतं अतिथिं केनचित्प्रकारेण निराकृत्य भोजने प्रवृत्तो भवति यदवस्था प्राप्ते भोजने स्मरेत् "धिङ्मया स निराकृत" इति तत्रैव भोजनाद्विरम्य तस्मिन्नहनि उपवसेत् "अतिथिं निराकृत्य यत्र गते भोजने स्मरेत्ततो विरम्योपोष्य" २-०८-१४ इति। एवमतिथिं समाहितमनाः अव्यग्रः यः भोजन-पूजनादिना संतर्पयति तस्य इहलोके उपद्रवाणाशान्तिर्भवति, प्रेत्य परस्मिन् लोके स्वर्गलाभश्च भवति "तस्य पूजायां शान्तिः स्वर्गश्च"।
आपस्तम्बः अध्ययनधर्मान् विवृण्वन् आदौ आचार्यशब्दं सूत्रेण सूचयामास "यस्माद्धर्मानाचिनोति स आचार्यः"०१-०१-१४ यस्मात्पुरुषात् धर्मान् आत्मनः शिक्षते अयं माणवकः स आचार्यः "तस्मै न द्रुह्येत्कदाचन" १-१-१५ एवंभूतमाचार्याय धर्मोपदेष्ट्रे कदाचिदपि तद्विषयमपकारं न कुर्यात्, यतः मातापितृभ्यामाचार्यः श्रेष्ठः "शरीरमेव मातापितारौ जनयतः" १-१-१८ काष्ठकुड्यादिसमं शरीरमात्रमेव मातापितरौ जनयतः, आचार्यस्तु सर्वपुरुषार्थक्षमरूपां तनुं जनयति। "आचार्यः श्रेष्ठो गुरूणामिति" गौतमः "सहि विद्यातस्तं जनयति"१-१-१६ सहि आचार्यः तं माणवकं विद्यातो जनयति, अभ्युदयनिःश्रेयसहेतुत्वात्, मातापितृभ्यां प्राप्तजनितः आचार्यात्प्राप्तं जन्म श्रेष्ठं प्रशस्ततमं भवति। अत एव आपस्तम्बः आह "तच्छ्रेष्ठं जन्म" १-१-१७ इति "मातरिपितर्याचार्यवच्छुश्रुषा" १-१४-०५ इति धर्मोपदेष्ट्रे आचार्याय यावति शुश्रूषा क्रियते तावती मातापित्रोः अपि कर्तव्या, एवं पितामही प्रपितामह्यदयो वृद्धाश्च शुश्रूषितव्याः, "ज्ञायमाने वयोविशेषे वृद्धतरायाऽभिवाद्यम्" १-१४-१४ वयोविशेषे ज्ञायमाने पूर्वं वृद्धतरः अभिवादनीयः पश्चाद्वृद्धाय सत्सु बहुषु वृद्धेषु वृद्धतरं पूर्वमभिवादयेदिति आचार्याभिमतः।
अरण्ये एकाकिनीं स्त्रियं दृष्ट्वा असम्भाष्य न व्यतिव्रजेत्, अरण्यशब्देन सभयस्य देशस्योपलक्षण्म्, सम्भाषणं च मातृवद्भगिनीवच्च – भगिनि किं ते करवाणि! न भेतव्यम् इति "अरण्ये च स्त्रियम्" १-१४-२८। एतैः सूत्रैः महर्षेरापस्तम्बस्य मतिः अत्यन्तं सामाजिकोपयोगिनी इति अवगम्यते।
आपस्तम्बमते विवाहस्य षड्भेदाः निरूपिताः, तेषु ब्राह्म-आर्ष-प्राजपत्याः उत्तमाः इति निगदिताः, राक्षस-पैशाच-आसुरा अधमा इति निरूप्य "यथायुक्तो विवाहस्तथा युक्ता प्रजा भवति" २-१२-०४ इति प्रशस्ते विवाहे जाता सन्ततिः प्रशस्ता भवति, निन्दिते विवाहे निन्दनीया सन्ततिर्भवतीति विवाह संस्कारस्य औन्नत्यं निरूपितम् महर्षिणा, एवं द्वितीयविवाहं निराचकार आचार्यः एकपत्नीत्वव्रतस्य प्राधान्यं ख्यापितं आचार्येण "धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत" २-११-१२ इति, दानविषये च "भिक्षणे

निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षाऽर्हतश्च नियमविलोपः” २-१०-०१
आचार्यार्थं विवाहार्थं, मातापित्रोः पोषणार्थं, विद्यार्थं यः याचते तस्मै एव धनादिकं दद्यात्, तत्रापि याचतः श्रुतवृत्तादिकान् गुणान् समीक्ष्य शक्त्यनुरूपमवश्यं देयम्, इन्द्रियप्रीत्यर्थं यो भिक्षते तस्मै न दद्यात् “इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम्” २-१०-०३ इति तस्मात् तादृशं भिक्षुकं नाद्रियेत, अदानेऽपि न प्रत्यवायः, विवाहोऽपि द्वितीयो न निमित्तं सत्यां प्रथमायां धर्मप्रजासम्पन्नायां भार्यायाम्,
“यानस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया इति सर्वैर्दातव्यः”२-११-०७ शकटादेः यानस्य, भाराक्रान्तस्य–आतुरस्य-स्त्रियाश्च, एतेभ्यः पन्थाः दातव्यः इति उत्तमं सामाजिकं चिन्तनम् आपस्तम्बस्य, एवं दोषयुक्तं निषिद्धकर्मप्रवृत्तं राजा दण्डयेत्, तस्य राज्ञः दण्डार्हस्य दण्डनं प्रधानं कर्म भवति किन्तु अपराधसन्देहे राजा न दण्डं न कुर्यात् “सुविचितं विचित्य दैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्येत” २-११-०३। दैवप्रश्नेभ्यः साक्षिप्रश्नादिभिः शपथान्तैः सविचितं यथा भवति, तथा विचित्य निरूप्य राजा दण्डाय उपक्रमेत, दण्ड्यान् दण्डयन् अदण्ड्यान् अदण्डयन् “एवं वृत्तो राजोभौ लोकावभिजयति” मनुस्मृतावपि।

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकं चैव गच्छति ॥ म.स्मृ-०८-१२८

एवं यादृशः प्रजापालानतत्परः भवति चेदपि यस्य राज्ये ग्रामेऽरण्ये च चोरादिभयं विना सर्वोऽपि मनुष्यः सर्वथा संचरति स एव राजा क्षेमंकरः भवति नत्वन्यः शतं तुभ्यं, शतं तुभ्यमिति ददानोऽपि “क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते”०२-२५-१५ अमुं विषयं इदानीन्तनाः पालाकाः अपि अवगच्छेयुः प्रजाभ्यः धनरूपादिना संतर्पणेच्छुकाः नेतारः प्रजारक्षणे च सर्वथा कटिबद्धाः भवेयुः।
अनया सरण्या आपस्तम्बमहर्षिणा देश-कुल-जाति-वयो-गुण-शरीर-काल-आपद्धर्मेषु च सर्वत्र च लोकहितं सामाजिकचिन्तनमकरोत्, एवं सर्वोऽपि वर्णाश्रमी स्वविहितकर्माचरणेन अपरिमितं सुखं प्राप्नोति “सर्ववर्णानां स्वधर्मानुष्ठाने परमरिमितं सुखम्” ०२-०२-०२ इति विहितधर्माचरणफलं न्यरूपयत् आचार्यः आपस्तम्बः। यत्र नोपदिष्टाः उक्तव्यतिरिक्ताः ये धर्माः ते च “यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो यद्गर्हन्ते सोऽधर्मः”०१-२०-०७ शिष्टाचारप्रयुक्तं परम्परानुगतं यत् कर्मसमाचरेत् स एव धर्मः तद्भिन्नः अधर्मः। एवमेव धर्माधर्मविषये सन्देहे “सर्वजनपदेषु एकान्त समाहितं आर्याणां वृत्तं सम्यग्विनीतानां वृद्धानां आत्मवतां अलोलुपानां अदाम्भिकानां वृत्तसादृश्यं भजेत” १-२०-०८। सम्यग्विनीताः-परिणतवयसः-जितेन्द्रियाः-अकृपणाः-अधर्मध्वजाः एकान्तप्रकाशयोरेकवृत्ताः एवभूतानामार्याणां सर्वजनपदेषु यदेकान्तेनाऽव्यभिचारेण समाहितमनुमतं वृत्तमनुष्ठानं तदनुरूपं चेष्टेत तेषामनुष्ठानं धर्मत्वेनानुतिष्ठेत् इति आपस्तम्बस्य आशयः।

धर्मं चरत माधर्मं सत्यं वदत मानृतम्।
दीर्घं पश्यत मा ह्रस्वं परं पश्यत मापरम्।। व.ध.सू.-०८- ०४

अधर्मं अनाचरन्तः धर्ममनुचरत, अनृतं परिहरन्तः सत्यं भाषध्वम्, सङ्कुचितदृष्टिं त्यजत, यतः हीनदृष्ट्या अस्माकं मनश्च सङ्कुचितं भवति। उत्तमवस्तूपलब्धये यदि प्रयतामहे अवश्यं प्राप्नवाम। अतः अस्माकं मतयश्च परे वस्तुनि धर्मप्रदे प्रवर्तन्तामिति परमात्मानं प्रार्थयामः।

**सङ्केताक्षरसूची-**


1. म.स्मृ.- मनुस्मृतिः, 2010, 5th edition, mlbd, New delhi
2. आ.ध.सू-आपस्तम्बधर्मसूत्रम् 2001, Chowkhamba Sanskrit samsthan, Varanasi
3. व.ध.सू.-वसिष्ठधर्मसूत्रम्, http://www.hinduonline.co/vedicreserve/kalpa/dharma/vasishtha_dharma_sutra.pdf